# Prabodhasudhakara

# પ્રબોધસુધાકરઃ

## Document Information

Text title : prabodha sudhAkara

File name : prabodha.itx

Category : shankarAchArya

Location : doc_z_misc_shankara

Author : Shankaracharya

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : August 25, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 2, 2024

*sanskritdocuments.org*

# પ્રબોધસુધાકરઃ

## પ્રબોધસુધાકરસ્ય અનુક્રમણિકા

૧ દેહનિન્દાપ્રકરણમ્ ।
૨ વિષયનિન્દાપ્રકરણમ્ ।
૩ મનોનિન્દાપ્રકરણમ્ ।
૪ વિષયનિગ્રહપ્રકરણમ્ ।
૫ મનોનિગ્રહપ્રકરણમ્ ।
૬ વૈરાગ્યપ્રકરણમ્ ।
૭ આત્મસિદ્ધિપ્રકરણમ્ ।
૮ માયાસિદ્ધિપ્રકરણમ્ ।
૯ લિઙ્ગદેહાદિનિરૂપણપ્રકરણમ્ ।
૧૦ અદ્વૈતપ્રકરણમ્ ।
૧૧ કર્તૃત્વભોક્તૃત્વપ્રકરણમ્ ।
૧૨ સ્વપ્રકાશતાપ્રકરણમ્ ।
૧૩ નાદાનુસન્ધાનપ્રકરણમ્ ।
૧૪ મનોલયપ્રકરણમ્ ।
૧૫ પ્રબોધપ્રકરણમ્ ।
૧૬ દ્વિધાભક્તિપ્રકરણમ્ ।
૧૭ ધ્યાનવિધિપ્રકરણમ્ ।
૧૮ સગુણનિર્ગુણયોરૈક્યપ્રકરણમ્ ।
૧૯ આનુગ્રહિકપ્રકરણમ્ ।

॥ ૧॥ દેહનિન્દાપ્રકરણમ્ ।

નિત્યાનન્દૈકરસં સચ્ચિન્માત્રં સ્વયંજ્યોતિઃ ।
પુરુષોત્તમમજમીશં વન્દે શ્રીયાદવાધીશમ્ ॥ ૧॥

યં વર્ણયિતું સાક્ષાચ્છ્રુતિરપિ મૂકેવ મૌનમાચરતિ ।

સોઽસ્માકં મનુજાનાં કિં વાચાં ગોચરો ભવતિ ॥ ૨॥

યદ્યપ્યેવં વિદિતં તથાપિ પરિભાષિતો ભવેદેવ ।
અધ્યાત્મશાસ્ત્રસારૈર્હરિચિન્તનકીર્તનાભ્યાસૈઃ ॥ ૩॥

ક્લૃપ્તૈર્બહુભિરુપાયૈરભ્યાસજ્ઞાનભક્ત્યાદ્યૈઃ ।
પુંસો વિના વિરાગં મુક્તેરધિકારિતા ન સ્યાત્ ॥ ૪॥

વૈરાગ્યમાત્મબોધો ભક્તિશ્ચેતિ ત્રયં ગદિતમ્ ।
મુક્તેઃ સાધનમાદૌ તત્ર વિરાગો વિતૃષ્ણતા પ્રોક્તા ॥ ૫॥

સા ચાહંમમતાભ્યાં પ્રચ્છન્ના સર્વદેહેષુ ।
તત્રાહન્તા દેહે મમતા ભાર્યાદિવિષયેષુ ॥ ૬॥

દેહઃ કિમાત્મકોઽયં કઃ સંબન્ધોઽસ્ય વા વિષયૈઃ ।
એવં વિચાર્યમાણેઽહન્તામમતે નિવર્તેતે ॥ ૭॥

સ્ત્રીપુંસોઃ સંયોગાત્સમ્પાતે શુક્રશોણિતયોઃ ।
પ્રવિશઞ્જીવઃ શનકૈઃ સ્વકર્મણા દેહમાધત્તે ॥ ૮॥

માતૃગુરૂદરદર્યાં કફમૂત્રપુરીષપૂર્ણાયામ્ ।
જઠરાગ્નિજ્વાલાભિર્નવમાસં પચ્યતે જન્તુઃ ॥ ૯॥

દૈવાત્પ્રસૂતિસમયે શિશુસ્તિરશ્ચીનતાં યદા યાતિ ।
શસ્ત્રૈર્વિખણ્ડ્ય સ તદા બહિરિહ નિષ્કાસ્યતેઽતિબલાત્ ॥ ૧૦॥

અથવા યન્ત્રચ્છિદ્રાદ્યદ તુ નિઃસાર્યતે પ્રબલૈઃ ।
પ્રસવસમીરૈશ્ચ તદા યઃ ક્લેશઃ સોઽપ્યનિર્વાચ્યઃ ॥ ૧૧॥

આધિવ્યાધિવિયોગાત્મીયવિપત્કલહદીર્ઘદારિદ્ર્યૈઃ ।
જન્માન્તરમપિ યઃ ક્લેશઃ કિં શક્યતે વક્તુમ્ ॥ ૧૨॥

નરપશુવિહઙ્ગતિર્યગ્યોનીનાં ચતુરશીતિલક્ષાણામ્ ।
કર્મનિબદ્ધો જીવઃ પરિભ્રમન્યાતના ભુઙ્ક્તે ॥ ૧૩॥

ચરમસ્તત્ર નૃદેહસ્તત્રોજ્જન્માન્વયોત્પત્તિઃ ।
સ્વકુલાચારવિચારઃ શ્રુતિપ્રચારશ્ચ તત્રાપિ ॥ ૧૪॥

આત્માનાત્મવિવેકો નો દેહસ્ય ચ વિનાશિતાજ્ઞાનમ્ ।
એવં સતિ સ્વમાયુઃ પ્રાજ્ઞૈરપિ નીયતે મિથ્યા ॥ ૧૫॥

આયુઃક્ષણલવમાત્રં ન લભ્યતે હેમકોટિભિઃ ક્વાપિ ।
તચ્ચેદ્ગચ્છતિ સર્વં મૃષા તતઃ કાધિકા હાનિઃ ॥ ૧૬॥

નરદેહાતિક્રમણાત્પ્રાપ્તૌ પશ્વાદિદેહાનામ્ ।
સ્વતનોરપ્યજ્ઞાને પરમાર્થસ્યાત્ર કા વાર્તા ॥ ૧૭॥

સતતં પ્રવાહ્યમાનૈર્વૃષભૈરશ્વૈઃ ખરૈર્ગજૈર્મહિષૈઃ ।
હા કષ્ટં ક્ષુત્ક્ષામૈઃ શ્રાન્તૈર્નો શક્યતે વક્તુમ્ ॥ ૧૮॥

રુધિરત્રિધાતુમજ્જામેદોમાંસાસ્થિસંહતિર્દેહઃ ।
સ બહિસ્ત્વચા પિનદ્ધસ્તસ્માન્નો ભક્ષ્યતે કાકૈઃ ॥ ૧૯॥

નાસાગ્રાદ્વદનાદ્વા કફં મલં પાયુતો વિસૃજન્ ।
સ્વયમેવૈતિ જુગુપ્સામન્તઃ પ્રસૃતં ચ નો વેત્તિ ॥ ૨૦॥

પથિ પતિતમસ્થિ દૃષ્ટ્વા સ્પર્શભયાદન્યમાર્ગતો યાતિ ।
નો પશ્યતિ નિજદેહં ચાસ્થિસહસ્રાવૃતં પરિતઃ ॥ ૨૧॥

કેશાવધિ નખરાગ્રાદિદમન્તઃ પૂતિગન્ધસમ્પૂર્ણમ્ ।
બહિરપિ ચાગરુચન્દનકર્પૂરાદ્યૈર્વિલેપયતિ ॥ ૨૨॥

યત્નાદસ્ય પિધત્તે સ્વાભાવિકદોષસંઘાતમ્ ।
ઔપાધિકગુણનિવહં પ્રકાશયઞ્શ્લાઘતે મૂઢઃ ॥ ૨૩॥

ક્ષતમુતન્નં દેહે યદિ ન પ્રક્ષાલ્યતે ત્રિદિનમ્ ।
તત્રોત્પતન્તિ બહવઃ ક્રિમયો દુર્ગન્ધસંકીર્ણાઃ ॥ ૨૪॥

યો દેહઃ સુપ્તોઽભૂત્સુપુષ્પશય્યોપશોભિતે તલ્પે ।
સમ્પ્રતિ સ રજ્જુકાષ્ઠૈર્નિયન્ત્રિતઃ ક્ષિપ્યતે વહ્નૌ ॥ ૨૫॥

સિંહાસનોપવિષ્ટં દૃષ્ટ્વા યં મુદમવાપ લોકોઽયમ્ ।
તં કાલાકૃષ્ટતનું વિલોક્ય નેત્રે નિમીલયતિ ॥ ૨૬॥

એવંવિધોઽતિમલિનો દેહો યત્સત્તયા ચલતિ ।
તં વિસ્મૃત્ય પરેશં વહત્યહંતામનિત્યેઽસ્મિન્ ॥ ૨૭॥

ક્વાત્મા સચ્ચિદ્રૂપઃ ક્વ માંસરુધિરાસ્થિનિર્મિતો દેહઃ ।
ઇતિ યો લજ્જતિ ધીમાનિતરશરીરં સ કિં મનુતે ॥ ૨૮॥

॥ ૨॥ વિષયનિન્દાપ્રકરણમ્ ।

મૂઢઃ કુરુતે વિષયજકર્દમસંમાર્જનં મિથ્યા ।
દુરદૃષ્ટવૃષ્ટિવિરસો દેહો ગેહં પતત્યેવ ॥ ૨૯॥

ભાર્યા રૂપવિહીના મનસઃ ક્ષોભાય જાયતે પુંસામ્ ।
અત્યન્તં રૂપાઢ્યા સા પરપુરુષૈર્વશીક્રિયતે ॥ ૩૦॥

યઃ કશ્ચિત્પરપુરુષો મન્ત્રં ભૃત્યોઽથવા ભિક્ષુઃ ।
પશ્યતિ હિ સાભિલાષં વિલક્ષણોદારરૂપવતીમ્ ॥ ૩૧॥

યં કંચિત્પુરુષવરં સ્વભર્તુરતિસુન્દરં દૃષ્ટ્વા ।
મૃગયતિ કિં ન મૃગાક્ષી મનસેવ પરસ્ત્રિયં પુરુષઃ ॥ ૩૨॥

એવં સુરૂપનાર્યા ભર્તા કોપાત્પ્રતિક્ષણં ક્ષીણઃ ।
નો લભતે સુખલેશં બલિમિવ બલિભુગ્બહુષ્વેકઃ ॥ ૩૩॥

વનિતા નિતાન્તમજ્ઞા સ્વાજ્ઞામુલ્લઙ્ઘ્ય વર્તતે યદિ સા ।
શત્રોરપ્યધિકતરા પરભિલાષિણ્યસૌ કિમુત ॥ ૩૪॥

લોકો નાપુત્રસ્યાસ્તીતિ શ્રુત્યાસ્ય કઃ પ્રભાષિતો લોકઃ ।
મુક્તિઃ સંસરણં વા તદન્યલોકોઽથવા નાદ્યઃ ॥ ૩૫॥

સર્વેઽપિ પુત્રભાજસ્તન્મુક્તૌ સંસૃતિર્ભવતિ ।
શ્રવણાદયોઽપ્યુપાયા મૃષા ભવેયુસ્તૃતીયેઽપિ ॥ ૩૬॥

તત્પ્રાપ્ત્યુપાયસત્ત્વાદ્દ્વિતીયપક્ષેઽપ્યપુત્રસ્ય ।
પુત્રેષ્ટ્યાદિકયાગપ્રવૃત્તયે વેદવાદોઽયમ્ ॥ ૩૭॥

નાનાશરીરકષ્ટૈર્ધનવ્યયૈઃ સાધ્યતે પુત્રઃ ।
ઉત્પન્નમાત્રપુત્રે જીવિતચિન્તા ગરીયસી તસ્ય ॥ ૩૮॥

જીવન્નપિ કિં મૂર્ખઃ પ્રાજ્ઞઃ કિં વા સુશીલભાગ્ભવિતા ।
જારશ્ચૌરઃ પિશુનઃ પતિતો દ્યૂતપ્રિયઃ ક્રૂરઃ ॥ ૩૯॥

પિતૃમાતૃબન્ધુઘાતી મનસઃ ખેદાય જાયતે પુત્રઃ ।
ચિન્તયતિ તાતનિધનં પુત્રો દ્રવ્યાદ્યધીશતાહેતોઃ ॥ ૪૦॥

સર્વગુણૈરુપપન્નઃ પુત્રઃ કસ્યાપિ કુત્રચિદ્ભવતિ ।
સોઽલ્પાયૂ રુગ્ણો વા હ્યનપત્યો વા તથાપિ ખેદાય ॥ ૪૧॥

પુત્રાત્સદ્ગતિરિતિ ચેત્તદપિ પ્રાયોઽસ્તિ યુક્ત્યસહમ્ ।
ઇત્થં શરીરકષ્ટૈર્દુઃખં સમ્પ્રાર્થ્યતે મૂઢૈઃ ॥ ૪૨॥

પિતૃમાતૃબન્ધુભગિનીપિતૃવ્યજામાતૃમુખ્યાનામ્ ।
માર્ગસ્થાનામિવ યુતિરનેકયોનિભ્રમાત્ક્ષણિકા ॥ ૪૩॥

દૈવં યાવદ્વિપુલં યાવત્પ્રચુરઃ પરોપકારશ્ચ ।
તાવત્સર્વે સુહૃદો વ્યત્યયતઃ શત્રવઃ સર્વે ॥ ૪૪॥

અશ્નન્તિ ચેદનુદિનં વન્દિન ઇવ વર્ણયન્તિ સંતૃપ્તાઃ ।
તચ્ચેદ્વિત્રદિનાન્તરમભિનિન્દન્તઃ પ્રકુપ્યન્તિ ॥ ૪૫॥

દુર્ભરજઠરનિમિત્તં સમુપાર્જયિતું પ્રવર્તતે ચિત્તમ્ ।
લક્ષાવધિ બહુવિત્તં તથાપ્યલભ્યં કપર્દિકામાત્રમ્ ॥ ૪૬॥

લબ્ધશ્ચેદધિકોઽર્થઃ પત્ન્યાદીનાં ભવેત્સ્વાર્થઃ ।
નૃપચૌરતોઽપ્યનર્થસ્તસ્માદ્વ્યોદ્યમો વ્યર્થઃ ॥ ૪૭॥

અન્યાયમર્થભાજં પશ્યતિ ભૂપોઽધ્વગામિનં ચૌરઃ ।
પિશુનો વ્યસનપ્રાપ્તિં દાયાદાનાં ગણઃ કલહમ્ ॥ ૪૮॥

પાતકભરૈરનેકૈરર્થં સમુપાર્જયન્તિ રાજાનઃ ।
અશ્વમતઙ્ગજહેતોઃ પ્રતિક્ષણં નાશ્યતે સોઽર્થઃ ॥ ૪૯॥

રાજ્યાન્તરાભિગમનાદ્રણભઙ્ગાન્મન્ત્રિભૃત્યદોષાદ્વા ।
વિષશસ્ત્રગુપ્તઘાતાન્મગ્નાશ્ચિન્તાર્ણવે ભૂપાઃ ॥ ૫૦॥

॥ ૩॥ મનોનિન્દાપ્રકરણમ્ ।

હસતિ કદાચિદ્રૌતિ ભ્રાન્તં સદ્દશ દિશો ભ્રમતિ ।
હૃષ્ટે કદાપિ રુષ્ટે શિષ્ટે દુષ્ટે ચ નિન્દતિ
સ્તૌતિ ॥ ૫૧॥

કિમપિ દ્વેષ્ટિ સરોષં હ્યાત્માનં શ્લાઘતે કદાચિદપિ ।
ચિત્તં પિશાચમભવદ્રાક્ષસ્યા તૃષ્ણયા વ્યાપ્તમ્ ॥ ૫૨॥

દમ્ભાભિમાનલોભૈઃ કામક્રોધોરુમત્સરૈશ્ચેતઃ ।
આકૃષ્યતે સમન્તાચ્છ્વભિરિવ પતિતાસ્થિવન્માર્ગે ॥ ૫૩॥

તસ્માચ્છુદ્ધવિરાગો મનોઽભિલષિતં ત્યજેદર્થમ્ ।
તદનભિલષિતં કુર્યાન્નિર્વ્યાપારં તતો ભવતિ ॥ ૫૪॥

॥ ૪॥ વિષયનિગ્રહપ્રકરણમ્ ।

સંસૃતિપારાવારે હ્યગાધવિષયોદકેન સમ્પૂર્ણે ।
નૃશરીરમમ્બુતરણં કર્મસમીરૈરતસ્તતશ્ચલતિ ॥ ૫૫॥

છિદ્રૈર્નવભિરુપેતં જીવો નૌકાપતિર્મહાનલસઃ ।
છિદ્રાણામનિરોધાજ્જલપરિપૂર્ણ પતત્યધઃ સતતમ્ ॥ ૫૬॥

છિદ્રાણાં તુ નિરોધાત્સુખેન પારં પરં યાતિ ।
તસ્માદિન્દ્રિયનિગ્રહમૃતે ન કશ્ચિત્તરત્યનૃતમ્ ॥ ૫૭॥

પશ્યતિ પરસ્ય યુવતિ સકામમપિ તન્મનોરથં કુરુતે ।
જ્ઞાત્વૈવ તદપ્રાપ્તિં વ્યર્થં મનુજોઽતિપાપભાગ્ભવતિ ॥ ૫૮॥

પિશુનૈઃ પ્રકામમુદિતાં પરસ્ય નિન્દાં શ્રૃણોતિ કર્ણાભ્યામ્ ।
તેન પરઃ કિં મ્રિયતે વ્યર્થં મનુજોઽતિપાપભાગ્ભવતિ ॥ ૫૯॥

અનૃતં પરાપવાદં રસના વદતિ પ્રતિક્ષણં તેન ।
પરહાનિર્લબ્ધિઃ કા વ્યર્થં મનુજોઽતિપાપભાગ્ભવતિ ॥ ૬૦॥

વિષયેન્દ્રિયયોર્યોગે નિમેપસમયેન યત્સુખં ભવતિ ।
વિષયે નષ્ટે દુઃખં યાવજ્જિવં ચ તત્તયોર્મધ્યે ॥ ૬૧॥

હેયમુપાદેયં વા પ્રવિચાર્ય સુનિશ્ચિતં તસ્માત્ ।
અલ્પસુખસ્ય ત્યાગાદનલ્પદુઃખં જહાતિ સુધીઃ ॥ ૬૨॥

ધીવરદત્તમહામિષમશ્નન્વૈસારિણો મ્રિયતે ।
તદ્વદ્વિષયાન્ભુઞ્જન્કલાકૃષ્ટો નરઃ પતતિ ॥૬૩॥

ઉરગગ્રસ્તાર્ધતનુર્ભેકોઽશ્નાતીહ મક્ષિકાઃ શતશઃ ।
એવં ગતાયુરપિ સન્વિષયાન્સમુપાર્યત્યન્ધઃ ॥ ૬૪॥

॥ ૫॥ મનિનિગ્રહપ્રકરણમ્ ।

સ્વીયોદ્ગમતોયવહા સાગરમુપયાતિ નીચમાર્ગેણ ।
સા ચેદુદ્ગમ એવ સ્થિરા સતી કિં ન યાતિ વાર્ધિત્વમ્ ॥ ૬૫॥

એવં મનઃ સ્વહેતું વિચારયત્સુસ્થિરં ભવેદન્તઃ ।
ન બહિર્વોદેતિ તદા કિં નાત્મત્વં સ્વયં યાતિ ॥ ૬૬॥

વર્ષાસ્વમ્ભઃપ્રચયાત્કૂપે ગુરુનિર્ઝરે પયઃ ક્ષારમ્ ।
ગ્રીષ્મેણૈવ તુ શુષ્કે માધુર્યં ભજતિ તત્રામ્ભઃ ॥ ૬૭॥

તદ્વદ્વિષયોદ્રિક્તં તમઃપ્રધાનં મનઃ કલુષમ્ ।
તસ્મિન્વિરાગશુષ્કે શનકૈરાવિર્ભવેત્સત્ત્વમ્ ॥ ૬૮॥

યં વિષયમપિ લષિત્વા ધાવતિ બાહ્યેન્દ્રિયદ્વારા ।
તસ્યાપ્રાપ્તૌ ખિદ્યતિ તથા યથા સ્વં ગતં કિંચિત્ ॥ ૬૯॥

નગનગરદુર્ગદુર્ગમસરિતઃ પરિતઃ પરિભ્રમચ્ચેતઃ ।
યદિ નો લભતે વિષયં વિષયન્ત્રિતમિવ ખિન્નમાયાતિ ॥ ૭૦॥

તુમ્બીફલં જલાન્તર્બલાદધઃ ક્ષિપ્તમપ્યુપૈત્યૂર્ધ્વમ્ ।
તદ્વન્મનઃ સ્વરૂપે નિહિતં યત્નાદ્બહિર્યાતિ ॥ ૭૧॥

ઇહ વા પૂર્વભવે વા સ્વકર્મણૈવાર્જિતં ફલં યદ્યત્ ।
શુભમશુભં વા તત્તદ્ભોગોઽપ્યપ્રાર્થિતો ભવતિ ॥ ૭૨॥

ચેતઃપશુમશુભપથં પ્રધાવમાનં નિરાકર્તુમ્ ।
વૈરાગ્યમેકમુચિતં ગલકાષ્ઠં નિર્મિતં ધાત્રા ॥ ૭૩॥

નિદ્રાવસરે યત્સુખમેતત્કિં વિષયજં યસ્માત્ ।
ન હિ ચેન્દ્રિયપ્રદેશાવસ્થાનં ચેતસો નિદ્રા ॥ ૭૪॥

અદ્વારતુઙ્ગકુડ્યે ગૃહેઽવરુદ્ધો યથા વ્યાઘ્રઃ ।
બહુનિર્ગમપ્રયત્નૈઃ શ્રાન્તસ્તિષ્ઠતિ પતઙ્ગસંશ્ચ તથા ॥ ૭૫॥

સર્વેન્દ્રિયાવરોધાદુદ્યોગશતૈરનિર્ગમં વીક્ષ્ય ।
શાન્તં તિષ્ઠતિ ચેતો નિરુદ્યમત્વં તદા યાતિ ॥ ૭૬॥

પ્રાણસ્પન્દનિરોધાત્સત્સઙ્ગાદ્વાસનાત્યાગાત્ ।
હરિચરણભક્તિયોગાન્મનઃ સ્વવેગં જહાતિ શનૈઃ ॥ ૭૭॥

---

॥ ૬॥ વૈરાગ્યપ્રકરણમ્ ।

પરગૃહગૃહિણીપુત્રદ્રવિણાનામાગમે વિનાશે વા ।
કથિતૌ હર્ષવિષાદૌ કિં વા સ્યાતાં ક્ષણં સ્થાતુઃ ॥ ૭૮॥

દૈવાત્સ્થિતં ગતં વા યં કંચિદ્વિષયમીડ્યમલ્પં વા ।
નો તુષ્યન્ન ચ સીદન્વીક્ષ્ય ગૃહેષ્વતિથિવન્નિવસેત્ ॥ ૭૯॥

મમતાભિમાનશૂન્યો વિષયેષુ પરાઙ્મુખઃ પુરુષઃ ।
તિષ્ઠન્નપિ નિજસદને ન બાધ્યતે કર્મભિઃ ક્વાપિ ॥ ૮૦॥

કુત્રાપ્યરણ્યદેશે સુનીલતૃણવાલિકોપચિતે ।
શીતલતરુતલભૂમૌ સુખં શયાનસ્ય પુરુષસ્ય ॥ ૮૧॥

તરવઃ પત્રફલાઢ્યાઃ સુગન્ધશીતાનિલાઃ પરિતઃ ।
કલકૂજિતવરવિહગાઃ સરિતો મિત્રાણિ કિં ન સ્યુઃ ॥ ૮૨॥

વૈરાગ્યભાગ્યભાજઃ પ્રસન્નમનસો નિરાશસ્ય ।
અપ્રાર્થિતફલભોક્તુઃ પુંસો જન્મનિ કૃતાર્થતેહ સ્યાત્ ॥ ૮૩॥

દ્રવ્યં પલ્લવતશ્ચ્યુતં યદિ ભવેત્ક્વાપિ પ્રમાદાત્તદા
શોકાયાથ તદર્પિતં શ્રુતવતે તોષાય ચ શ્રેયસે ।
સ્વાતન્ત્ર્યાદ્વિષયાઃ પ્રયાન્તિ યદમી શોકાય તે સ્યુશ્ચિરં
સંત્યક્તાઃ સ્વયમેવ ચેત્સુખમયં નિઃશ્રેયસં તન્વતે ॥ ૮૪॥

વિસ્મૃત્યાત્મનિવાસમુત્કટભવાટવ્યાં ચિરં પર્યટ-
ન્સંતાપત્રયદીર્ઘદાવદહનજ્વાલાવલીવ્યાકુલઃ ।
વલ્ગન્કૂલ્ગુષુ સુપ્રદીપ્તનયનશ્ચેતઃકુરઙ્ગો બલા-
દાશાપાશવશીકૃતોઽપિ વિષયવ્યાઘ્રૈર્મૃષા
હન્યતે ॥ ૮૫॥

॥ ૭॥ આત્મસિદ્ધિપ્રકરણમ્ ।

ઉત્પન્નેઽપિ વિરાગે વિના પ્રબોધં સુખં ન સ્યાત્ ।
સ ભવેદ્ગુરૂપદેશાત્તસ્માદ્ગુરુમાશ્રયેત્પ્રથમમ્ ॥ ૮૬॥

યદ્યપિ જલધેરુદકં યદ્યપિ વા પ્રેરકોઽનિલસ્તત્ર ।
તદપિ પિપાસાકુલિતઃ પ્રતીક્ષતે ચાતકો મેઘમ્ ॥ ૮૭॥

ત્રેધા પ્રતીતિરુક્તા શાસ્ત્રાદ્ગુરુતસ્તથાત્મનસ્તત્ર ।
શાસ્ત્રપ્રતીતિરાદૌ યદ્વન્મધુરો ગુડોઽસ્તીતિ ॥ ૮૮॥

અગ્રે ગુરુપ્રતીતિર્દૂરાદ્ગુડદર્શનં યદ્વત્ ।
આત્મપ્રતીતિરસ્માદ્ગુડભક્ષણજં સુખં યદ્વત્ ॥ ૮૯॥

રસગન્ધરૂપશબ્દસ્પર્શા અન્યે પદાર્થાશ્ચ ।
કસ્માદનુભૂયન્તે નો દેહાન્નેન્દ્રિયગ્રામાત્ ॥ ૯૦॥

મૃતદેહેન્દ્રિયવર્ગો યતો ન જાનાતિ દાહજં દુઃખમ્ ।
પ્રાણશ્ચેન્નિદ્રાયાં તસ્કરબાધાં સ કિં વેત્તિ ॥ ૯૧॥

મનસો યદિ વા વિષયસ્તદ્યુગપત્કિં ન જાનાતિ ।
તસ્ય પરાધીનત્વાદ્યતઃ પ્રમાદસ્ય કસ્ત્રાતા ॥ ૯૨॥

ગાઢધ્વાન્તગૃહાન્તતઃ ક્ષિતિતલે દીપં નિધાયોજ્જ્વલં
પઞ્ચચ્છિદ્રમધોમુખં હિ કલશં તસ્યોપરિ સ્થાપયેત્ ।
તદ્બાહ્યે પરિતોઽનુરન્ધ્રમમલાં વીણાં ચ કસ્તૂરિકાં
સદ્રત્નં વ્યજનં ન્યસેચ્ચ
કલશચ્છિદ્રાધ્વનિર્ગચ્છતામ્ ॥ ૯૩॥

તેજોંશેન પૃથક્પદાર્થનિવહજ્ઞાનં હિ યજ્જાયતે
તદ્રન્ધ્રૈઃ કલશેન વા કિમુ મૃદો ભાણ્ડેન તૈલેન વા ।
કિં સૂત્રેણ ન ચૈતદસ્તિ રુચિરં પ્રત્યક્ષબાધાદતો
દીપજ્યોતિરિહૈકમેવ શરણં દેહે તથાત્મા સ્થિતઃ ॥ ૯૪॥

॥ ૮॥ માયાસિદ્ધિપ્રકરણમ્ ।

ચિન્મત્રઃ પરમાત્મા હ્યપશ્યદાત્માનમાત્મતયા ।
અભવત્સોઽહંનામા તસ્માદાસીદ્ભિદો મૂલમ્ ॥ ૯૫॥

દ્વેધૈવ ભાતિ તસ્માત્પતિશ્ચ પત્ની ચ તૌ ભવેતાં વૈ ।
તસ્માદયમાકાશસ્ત્રિધૈવ પરિપૂર્યતે સતતમ્ ॥ ૯૬॥

સોઽયમપીક્ષાં ચક્રે તતો મનુષ્યા અજાયન્ત ।
ઇત્યુપનિષદઃ પ્રાહુર્દયિતાં પ્રતિ યાજ્ઞવલ્ક્યોક્ત્યા ॥ ૯૭॥

ચિરમાનન્દાનુભવાત્સુષુપ્તિરિવ કાપ્યવસ્થાભૂત્ ।
પરમાત્મનસ્તુ તસ્માત્સ્વપ્નવદેવોત્થિતા માયા ॥ ૯૮॥

સદસદ્વિલક્ષણાસૌ પરમાત્મસદાશ્રયાનાદિઃ ।
સા ચ ગુણત્રયરૂપા સૂતે સચરાચરં વિશ્વમ્ ॥ ૯૯॥

માયા તાવદદૃશ્યા દૃશ્યં કાર્યં કથં જનયેત્ ।
તન્તુભિરદૃશ્યરૂપૈઃ પટોઽત્ર દૃશ્યઃ કથં ભવતિ ॥ ૧૦૦॥

સ્વપ્ને સુરતાનુભવાચ્છુક્રદ્રાવોયથા શુભે વસને ।

અનૃતં રતં પ્રબોધે વસનોપહતિર્ભવેત્સત્યા ॥ ૧૦૧॥

સ્વપ્ને પુરુષઃ સત્યો યોષિદસત્યા તયોર્યુતિશ્ચ મૃષા ।
શુક્રદ્રાવઃ સત્યસ્તદ્વત્પ્રકૃતેઽપિ સંભવતિ ॥ ૧૦૨॥

એવમદૃશ્યા માયા તત્કાર્યં જગદિદં દૃશ્યમ્ ।
માયા તાવદિયં સ્યાદ્યા સ્વવિનાશેન હર્ષદા ભવતિ ॥ ૧૦૩॥

રજનીવાતિદુરન્તા ન લક્ષ્યતેઽત્ર સ્વભવોઽસ્યાઃ ।
સૌદામિનીવ નશ્યતિ મુનિભિઃ સમ્પ્રક્ષ્યમાણૈવ ॥ ૧૦૪॥

માયા બ્રહ્મોપગતાવિદ્યા જીવાશ્રયા પ્રોક્તા ।
ચિદચિદ્ગ્રન્થિશ્ચેતસ્તદક્ષયં જ્ઞેયમા મોક્ષાત્ ॥ ૧૦૫॥

ઘટમઠકુડ્યૈરાવૃતમાકાશં તત્તદાહ્વયં ભવતિ ।
તદ્વદવિદ્યાવૃતમિહ ચૈતન્યં જીવ ઇત્યુક્તઃ ॥ ૧૦૬॥

નનુ કથમાવરણં સ્યાદજ્ઞાનં બ્રહ્મણો વિશુદ્ધસ્ય ।
સૂર્યસ્યેવ તમિસ્રં રાત્રિભવં સ્વપ્રકાશસ્ય ॥ ૧૦૭॥

દિનકરકિરણોત્પન્નૈર્મેઘૈરાચ્છાદ્યતે યથા સૂર્યઃ ।
ન ખલુ દિનસ્ય દિનત્વં તૈર્વિકૃતૈઃ સાન્દ્રસંઘાતૈઃ ॥ ૧૦૮॥

અજ્ઞાનેન તથાત્મા શુદ્ધોઽપિ ચ્છાદ્યતે સુચિરમ્ ।
ન પરંતુ લોકસિદ્ધા પ્રાણિષુ તચ્ચેતનાશક્તિઃ ॥ ૧૦૯॥

---

॥ ૯॥ લિઙ્ગદેહાદિનિરૂપણપ્રકરણમ્ ।
સ્થૂલશરીરસ્યાન્તર્લિઙ્ગશરીરં ચ તસ્યાન્તઃ ।
કારણમસ્યાપ્યન્તસ્તતો મહાકારણં તુર્યમ્ ॥ ૧૧૦॥

સ્થૂલં નિરૂપિતં પ્રાગધુના સૂક્ષ્માદિતો બ્રૂમઃ ।
અઙ્ગુષ્ઠમાત્રઃ પુરુષઃ શ્રુતિરિતિ યત્પ્રાહ તત્સૂક્ષ્મમ્ ॥ ૧૧૧॥

સૂક્ષ્માણિ મહાભૂતાન્યસવઃ પઞ્ચેન્દ્રિયાણિ પઞ્ચૈવ ।
ષોડશમન્તઃકરણં તત્સંઘાતો હિ લિઙ્ગતનુઃ ॥ ૧૧૨॥

તત્કારણં સ્મૃતં યત્તસ્યાન્તર્વાસનાજાલમ્ ।
તસ્ય પ્રવૃત્તિહેતુર્બુદ્ધ્યાશ્રયમત્ર તુર્યં સ્યાત્ ॥ ૧૧૩॥

તત્સારભૂતબુદ્ધો યત્પ્રતિફલિતં તુ શુદ્ધચૈતન્યમ્ ।

જીવઃ સ ઉક્ત આદ્યૈર્યોઽહમિતિ સ્ફૂર્તિકૃદ્વપુષિ ॥ ૧૧૪॥

ચરતરતરઙ્ગસઙ્ગાત્પ્રતિબિમ્બં ભાસ્કરસ્ય ચ ચલં
સ્યાત્ ।
અસ્તિ તથા ચઞ્ચલતા ચૈતન્યે ચિત્તચાઞ્ચલ્યાત્ ॥ ૧૧૫॥

નન્વર્કપ્રતિબિમ્બઃ સલિલાદિષુયઃ સ ચાવભાસયતિ ।
કિમિતરપદાર્થનિવહં પ્રતિબિમ્બોઽપ્યાત્મનસ્તદ્વત્ ॥ ૧૧૬॥

પ્રતિફલિતં યત્તેજઃ સવિતુઃ કાંસ્યાદિપાત્રેષુ ।
તદનુ પ્રવિષ્ટમન્તર્ગૃહમન્યાર્થાન્પ્રકાશયતિ ॥ ૧૧૭॥

ચિત્પ્રતિબિમ્બસ્તદ્વદ્બુદ્ધિષુ યો જીવતાં પ્રાપ્તઃ ।
નેત્રાદીન્દ્રિયમાર્ગૈર્બહિરર્થાન્સોઽવભાસયતિ ॥ ૧૧૮॥

---

॥ ૧૦॥ અદ્વૈતપ્રકરણમ્ ।

તદિદં ય એવમાર્યો વેદ બ્રહ્માહમસ્મીતિ ।
સ ઇદં સર્વં ચ સ્યાત્તસ્ય હિ દેવાશ્ચ નેશતે ભૂત્યા ॥ ૧૧૯॥

યેષાં સ ભવત્યાત્મા યોઽન્યામથ દેવતામુપાસ્તે યઃ ।
અહમન્યોઽસાવન્યશ્ચેત્થં યો વેદ પશુવત્સઃ ॥ ૧૨૦॥

ઇત્યુપનિષદામુક્તિસ્તથા શ્રુતિર્ભગવદુક્તિશ્ચ ।
જ્ઞાની ત્વાત્મૈવેયં મતિર્મમેત્યત્ર યુક્તિરપિ ॥ ૧૨૧॥

ઋજુ વક્રં વા કાષ્ઠં હુતાશદગ્ધં સદગ્નિતાં યાતિ ।
તત્કિં હસ્તગ્રાહ્યં ઋજુવક્રાકારસત્ત્વેઽપિ ॥ ૧૨૨॥

એવં ય આત્મનિષ્ઠો હ્યાત્માકારશ્ચ જાયતે પુરુષઃ ।
દેહીવ દૃશ્યતેઽસૌ પરં ત્વસૌ કેવલો હ્યાત્મા ॥ ૧૨૩॥

પ્રતિફલતિ ભાનુરેકોઽનેકશરાવોદકેષુ યથા ।
તદ્વદસૌ પરમાત્મા હ્યેકોઽનેકેષુ દેહેષુ ॥ ૧૨૪॥

દૈવાદેકશરાવે ભગ્ને કિં વા વિલીયતે સૂર્યઃ ।
પ્રતિબિમ્બચઞ્ચલત્વાદર્કઃ કિં ચઞ્ચલો ભવતિ ॥ ૧૨૫॥

સ્વવ્યાપારં કુરુતે યથૈકસવિતુઃ પ્રકાશેન ।
તદ્વચ્ચરાચરમિદં હ્યેકાત્મસત્તયા ચલતિ ॥ ૧૨૬॥

યેનોદકેન કદલીચમ્પકજાત્યાદયઃ પ્રવર્ધન્તે ।
મૂલકપલાણ્ડુલશુનાસ્તેનૈવૈતે વિભિન્નરસગન્ધાઃ ॥ ૧૨૭॥

એકો હિ સૂત્રધારઃ કાષ્ઠપ્રકૃતીરનેકશો યુગપત્ ।
સ્તમ્ભાગ્રપટ્ટિકાયાં નર્તયતીહ પ્રગૂઢતયા ॥ ૧૨૮॥

ગુડખણ્ડશર્કરાદ્યા ભિન્નાઃ સ્યુર્વિકૃતયો યથૈકેક્ષોઃ ।
કેયૂરકઙ્કણાદ્યા યથૈકહેમ્નો ભિદાશ્ચ પૃથક્ ॥ ૧૨૯॥

એવં પૃથક્સ્વભાવં પૃથગાકારં પૃથગ્વૃત્તિ ।
જગદુચ્ચાવચમુચ્ચૈરેકેનૈવાત્મના ચલતિ ॥ ૧૩૦॥

સ્કન્ધધૃતસિદ્ધમન્નં યાવન્નાશ્નાતિ માર્ગગસ્તાવત્ ।
સ્પર્શભયક્ષુત્પીડે તસ્મિન્ભુક્તે ન તે ભવતઃ ॥ ૧૩૧॥

માનુષમતઙ્ગમહિષશ્વસૂકરાદિષ્વનુસ્યૂતમ્ ।
યઃ પશ્યતિ જગદીશં સ એવ ભુઙ્ક્તેઽદ્વયાનન્દમ્ ॥ ૧૩૨॥

---

॥ ૧૧॥ કર્તૃત્વભોક્તૃત્વપ્રકરણમ્ ।

યદ્વત્સૂર્યેઽભ્યુદિતે સ્વવ્યવહારં જનઃ કુરુતે ।
તં ન કરોતિ વિવસ્વાન્ન કારયતિ તદ્વદાત્માપિ ॥ ૧૩૩॥

લોહે હુતભુગ્વ્યાપ્તે લોહાન્તરતાડ્યમાનેઽપિ ।
તસ્યાન્તર્ગતવહ્નેઃ કિં સ્યાન્નિર્ઘાતજં દુઃખમ્ ॥ ૧૩૪॥

નિષ્ઠુરકુઠારઘાતૈઃ કાષ્ઠે સંછેદ્યમાનેઽપિ ।
અન્તર્વર્તી વહ્નિઃ કિં ઘાતૈશ્છેદ્યતે તદ્વત્ ॥ ૧૩૫॥

બ્રૂતે શ્રુતિરપિ ભૂયોઽનશ્નન્નન્યોઽભિચાકશીત્યાદિ ॥ ૧૩૬॥

નિશિ વેશ્મનિ પ્રદીપે દીપ્યતિ ચૌરસ્તુ વિત્તમપહરતિ ।
ઈરયતિ વારયતિ વા તં દીપઃ કિં તથાત્માપિ ॥ ૧૩૭॥

ગેહાન્તે દૈવવશાત્કસ્મિંશ્ચિત્સમુદિતે વિપન્ને વા ।
દીપસ્તુષ્યત્યથવા ખિદ્યતિ કિં તદ્વદાત્માપિ ॥ ૧૩૮॥

---

॥ ૧૨॥ સ્વપ્રકાશતાપ્રકરણમ્ ।

રવિચન્દ્રવહ્નિદીપપ્રમુખાઃ સ્વપરપ્રકાશાઃ સ્યુઃ ।

યદ્યપિ તથાપ્યમીભિઃ પ્રકાશ્યતે ક્વાપિ નૈવાત્મા ॥ ૧૩૯ ॥

ચક્ષુર્દ્વારૈવ સ્યાત્પરાત્મના ભાનમેતેષામ્ ।
યદ્વા તેઽપિ પદાર્થા ન જ્ઞાયન્તેઽથ કેવલાલોકાત્ ॥ ૧૪૦ ॥

તત્રાપ્યક્ષિદ્વારા સહાયભૂતો ન ચેદાત્મા ।
નો ચેત્સત્યાલોકે પશ્યત્યન્ધઃ કથં નાર્થાન્ ॥ ૧૪૧ ॥

સત્યાત્મન્યપિ કિં નો જ્ઞાનં તચ્ચેન્દ્રિયાન્તરેણ સ્યાત્ ।
અન્ધે દૃક્પ્રતિબન્ધે કરસંબન્ધે પદાર્થભાનં હિ ॥ ૧૪૨ ॥

જાનાતિ યેન સર્વં કેન ચ તં વા વિજાનીયાત્ ।
ઇત્યુપનિષદામુક્તિર્બધ્યત આત્માત્મના તસ્માત્ ॥ ૧૪૩ ॥

---

॥ ૧૩ ॥ નાદાનુસન્ધાનપ્રકરણમ્ ।

યાવત્ક્ષણં ક્ષણાર્ધં સ્વરૂપપરિચિન્તનં ક્રિયતે ।
તાવદ્દક્ષિણકર્ણે ત્વનાહતઃ શ્રૂયતે શબ્દઃ ॥ ૧૪૪ ॥

સિદ્ધ્યારમ્ભસ્થિરતાવિશ્રમવિશ્વાસબીજશુદ્ધીનામ્ ।
ઉપલક્ષણં હિ મનસઃ પરમં નાદાનુસન્ધનમ્ ॥ ૧૪૫ ॥

ભેરીમૃદઙ્ગશઙ્ખાદ્યાહતનાદે મનઃ ક્ષણં રમતે ।
કિં પુનરનાહતેઽસ્મિન્મધુમધુરેઽખણ્ડિતે સ્વચ્છે ॥ ૧૪૬ ॥

ચિત્તં વિષયોપરમાદ્યથા યથા યાતિ નૈશ્ચલ્યમ્ ।
વેણોરિવ દીર્ઘતરસ્તથા તથા શ્રૂયતે નાદઃ ॥ ૧૪૭ ॥

નાદાભ્યન્તર્વર્તિ જ્યોતિર્યદ્વર્તતે હિ ચિરમ્ ।
તત્ર મનો લીનં ચેન્ન પુનઃ સંસારબન્ધાય ॥ ૧૪૮ ॥

પરમાનન્દાનુભવાત્સુચિરં નાદાનુસન્ધાનાત્ ।
શ્રેષ્ઠશ્ચિત્તલયોઽયં સત્સ્વન્યલયેષ્વનેકેષુ ॥ ૧૪૯ ॥

---

॥ ૧૪ ॥ મનોલયપ્રકરણમ્ ।

સંસારતાપતપ્તં નાનાયોનિભ્રમાત્પરિશ્રાન્તમ્ ।
લબ્ધ્વા પરમાનન્દં ન ચલતિ ચેતઃ કદા ક્વાપિ ॥ ૧૫૦ ॥

અદ્વૈતાનન્દભરાત્કિમિદં કોઽહં ચ કસ્યાહમ્ ।

ઇતિ મન્થરતાં યાતં યદા તદા મૂર્છિતં ચેતઃ ॥ ૧૫૧॥

ચિરતરમાત્માનુભવાદાત્માકારં પ્રજાયતે ચેતઃ ।
સરિદિવ સાગરયાતા સમુદ્રભાવં પ્રયાત્યુચ્ચૈઃ ॥ ૧૫૨॥

આત્મન્યનુપ્રવિષ્ટં ચિત્તં નાપેક્ષતે પુનર્વિષયાન્ ।
ક્ષીરાદુદ્ધૃતમાજ્યં યથા પુનઃ ક્ષીરતાં ન યાતીહ ॥ ૧૫૩॥

દૃષ્ટૌ દ્રષ્ટરિ દૃશ્યે યદનુસ્યૂતં ચ ભાનમાત્રં
સ્યાત્ ।
તત્રોપક્ષીણં ચેચ્ચિત્તં તન્મૂર્છિતં ભવતિ ॥ ૧૫૪॥

યાતિ સ્વસંમુખત્વં દૃઙ્માત્રં વા યદા તદા ભવતિ ।
દૃશ્યદ્રષ્ટૃવિભેદો હ્યસંમુખેઽસ્મિન્ન તદ્ભવતિ ॥ ૧૫૫॥

એકસ્મિન્દૃઙ્માત્રે ત્રેધા દ્રષ્ટ્રાદિકં હિ સમુદેતિ ।
ત્રિવિધે તસ્મિઁલ્લીને દૃઙ્માત્રં શિષ્યતે પશ્ચાત્ ॥ ૧૫૬॥

દર્પણતઃ પ્રાક્પશ્ચાદસ્તિ મુખં પ્રતિમુખં તદાભાતિ ।
આદર્શેઽપિ ચ નષ્ટે મુખમસ્તિ મુખે તથૈવાત્મા ॥ ૧૫૭॥

॥ ૧૫॥ પ્રબોધપ્રકરણમ્ ।
માધુર્યં ગુડપિણ્ડે યત્તત્તસ્યાંશકેઽણુમાત્રેઽપિ ।
એવં ન પૃથગ્ભાવો ગુડત્વમધુરત્વયોરસ્તિ ॥ ૧૫૮॥

અથવા ન ભિન્નભાવઃ કર્પૂરામોદયોરેવમ્ ।
આત્મસ્વરૂપમનસાં પુંસાં જગદાત્મતાં યાતિ ॥ ૧૫૯॥

યદ્ભાવાનુભવઃ સ્યાન્નિદ્રાદૌ જાગરસ્યાન્તે ।
અન્તઃ સ ચેત્સ્થિરઃ સ્યાલ્લભતે હિ તદાદ્વયાનન્દમ્ ॥ ૧૬૦॥

અતિગમ્ભીરેઽપારે જ્ઞાનચિદાનન્દસાગરે સ્ફારે ।
કર્મસમીરણતરલા જીવતરઙ્ગાવલિઃ સ્ફુરતિ ॥ ૧૬૧॥

ખરતરકરૈઃ પ્રદીપ્તેઽભ્યુદિતે ચૈતન્યતિગ્માંશૌ ।
સ્ફુરતિ મૃષૈવ સમન્તાદનેકવિધજીવમૃગતૃષ્ણા ॥ ૧૬૨॥

અન્તરદૃષ્ટે યસ્મિઞ્જગદિદમારાત્પરિસ્ફુરતિ ।
દૃષ્ટે યસ્મિન્સકૃદપિ વિલીયતે ક્વાપ્યસદ્રૂપમ્ ॥ ૧૬૩॥

બાહ્યાભ્યન્તરપૂર્ણઃ પરમાનન્દાર્ણવે નિમગ્નો યઃ ।
ચિરમાપ્લુત ઇવ કલશો મહાહ્રદે જહ્નુતનયાયાઃ ॥ ૧૬૪॥

પૂર્ણાત્પૂર્ણતરે પરાત્પરતરેઽપ્યજ્ઞાતપારે હરૌ
સંવિત્સ્ફારસુધાર્ણવે વિરહિતે વીચીતરઙ્ગાદિભિઃ ।
ભાસ્વત્કોટિવિકાસિતોજ્જ્વલદિગાકાશપ્રકાશે પરે
સ્વાનન્દૈકરસે નિમગ્નમનસાં ન ત્વં ન ચાહં જગત્ ॥ ૧૬૫॥

---

॥ ૧૬॥ દ્વિધાભક્તિપ્રકરણમ્ ।

ચિત્તે સત્ત્વોત્પત્તૌ તટિદિવ બોધોદયો ભવતિ ।
તર્હ્યેવ સ સ્થિરઃ સ્યાદ્યદિ ચિત્તં શુદ્ધિમુપયાતિ ॥ ૧૬૬॥

શુદ્ધ્યતિ હિ નાન્તરાત્મા કૃષ્ણપદામ્ભોજભક્તિમૃતે ।
વસનમિવ ક્ષારોદૈર્ભક્ત્યા પ્રક્ષાલ્યતે ચેતઃ ॥ ૧૬૭॥

યદ્વત્સમલાદર્શે સુચિરં ભસ્માદિના શુદ્ધે ।
પ્રતિફલતિ વક્ત્રમુચ્ચૈઃ શુદ્ધે ચિત્તે તથા જ્ઞાનમ્ ॥ ૧૬૮॥

જાનન્તુ તત્ર બીજં હરિભક્ત્યા જ્ઞાનિનો યે સ્યુઃ ।
મૂર્તં ચૈવામૂર્તં દ્વે એવ બ્રહ્મણો રૂપે ॥ ૧૬૯॥

ઇત્યુપનિષત્તયોર્વા દ્વૌ ભક્તો ભગવદુપદિષ્ટૌ ।
ક્લેશાદક્લેશાદ્વા મુક્તિઃ સ્યાદેતયોર્મધ્યે ॥ ૧૭૦॥

સ્થૂલા સૂક્ષ્મા ચેતિ દ્વેધા હરિભક્તિરુદ્દિષ્ટા ।
પ્રારમ્ભે સ્થૂલા સ્યાત્સૂક્ષ્મા તસ્યાઃ સકાશાચ્ચ ॥ ૧૭૧॥

સ્વાશ્રમધર્માચરણં કૃષ્ણપ્રતિમાર્ચનોત્સવો નિત્યમ્ ।
વિવિધોપચારકરણૈર્હરિદાસૈઃ સંગમઃ શશ્વત્ ॥ ૧૭૨॥

કૃશ્ણકથાસંશ્રવણે મહોત્સવઃ સત્યવાદશ્ચ ।
પરયુવતૌ દ્રવિણે વા પરાપવાદે પરાઙ્મુખતા ॥ ૧૭૩॥

ગ્રામ્યકથાસૂદ્વેગઃ સુતીર્થગમનેષુ તાત્પર્યમ્ ।
યદુપતિકથાવિયોગે વ્યર્થં ગતમાયુરિતિ ચિન્તા ॥ ૧૭૪॥

એવં કુર્વતિ ભક્તિં કૃષ્ણકથાનુગ્રહોત્પન્ના ।
સમુદેતિ સૂક્ષ્મભક્તિર્યસ્યા હરિરન્તરાવિશતિ ॥ ૧૭૫॥

સ્મૃતિસત્પુરાણવાક્યૈર્યથાશ્રુતાયાં હરેર્મૂર્તૌ ।
માનસપૂજાભ્યાસો વિજનનિવાસેઽપિ તાત્પર્યમ્ ॥ ૧૭૬॥

સત્યં સમસ્તજન્તુષુ કૃષ્ણસ્યાવસ્થિતેર્જ્ઞાનમ્ ।
અદ્રોહો ભૂતગણે તતસ્તુ ભૂતાનુકમ્પા સ્યાત્ ॥ ૧૭૭॥

પ્રમિતયદૃચ્છાલાભે સન્તુષ્ટિર્દારપુત્રાદૌ ।
મમતાશૂન્યત્વમતો નિરહંકારત્વમક્રોધઃ ॥ ૧૭૮॥

મૃદુભાષિતા પ્રસાદો નિજનિન્દાયાં સ્તુતૌ સમતા ।
સુખદુઃખશીતોષ્ણદ્વન્દ્વસહિષ્ણુત્વમાપદો ન ભયમ્ ॥ ૧૭૯॥

નિદ્રાહારવિહારેષ્વનાદરઃ સઙ્ગરાહિત્યમ્ ।
વચને ચાનવકાશઃ કૃષ્ણસ્મરણેન શાશ્વતી શાન્તિઃ ॥ ૧૮૦॥

કેનાપિ ગીયમાને હરિગીતે વેણુનાદે વા ।
આનન્દાવિર્ભાવો યુગપત્સ્યાદ્દૃષ્ટસાત્ત્વિકોદ્રેકઃ ॥ ૧૮૧॥

તસ્મિન્નનુભવતિ મનઃ પ્રગૃહ્યમાણં પરાત્મસુખમ્ ।
સ્થિરતાં યાતે તસ્મિન્યાતિ મદોન્મત્તદન્તિદશામ્ ॥ ૧૮૨॥

જનુષુ ભગવદ્ભાવં ભગવતિ ભૂતાનિ પશ્યતિ ક્રમશઃ ।
એતાદૃશી દશા ચેત્તદૈવ હરિદસવર્યઃ સ્યાત્ ॥ ૧૮૩॥

॥ ૧૭॥ ધ્યાનવિધિપ્રકરણમ્ ।

યમુનાતટનિકટસ્થિતવૃન્દાવનકાનને મહારમ્યે ।
કલ્પદ્રુમતલભૂમૌ ચરણં ચરણોપરિ સ્થાપ્ય ॥ ૧૮૪॥

તિષ્ઠન્તં ઘનનીલં સ્વતેજસા ભાસયન્તમિહ વિશ્વમ્ ।
પીતામ્બરપરિધાનં ચન્દનકર્પૂરલિપ્તસર્વાઙ્ગમ્ ॥ ૧૮૫॥

આકર્ણપૂર્ણનેત્રં કુણ્ડલયુગમણ્ડિતશ્રવણમ્ ।
મન્દસ્મિતમુખકમલં સુકૌસ્તુભોદારમણિહારમ્ ॥ ૧૮૫॥

વલયાઙ્ગુલીયકાદ્યાનુજ્જ્વલયન્તં સ્વલઙ્કારાન્ ।
ગલવિલુલિતવનમાલં સ્વતેજસાપાસ્તકલિકાલમ્ ॥ ૧૮૭॥

ગુઞ્જારવાલિકલિતં ગુઞ્જાપુઞ્જાન્વિતે શિરસિ ।
ભુઞ્જાનં સહ ગોપૈઃ કુઞ્જાન્તરવર્તિનં હરિં સ્મરત ॥ ૧૮૮॥

મન્દારપુષ્પવાસિતમન્દાનિલસેવિતં પરાનન્દમ્ ।
મન્દાકિનીયુતપદં નમત મહાનન્દદં મહાપુરુષમ્ ॥ ૧૮૯॥

સુરભીકૃતદિગ્વલયં સુરભિશતૈરાવૃતં સદા પરિતઃ ।
સુરભીતિક્ષપણમહાસુરભીમં યાદવં નમત ॥ ૧૯૦॥

કંદર્પકોટિસુભગં વાઞ્છિતફલદં દયાર્ણવં
કૃષ્ણમ્ ।
ત્યક્ત્વા કમન્યવિષયં નેત્રયુગં દ્રષ્ટુમુત્સહતે ॥ ૧૯૧॥

પુણ્યતમામતિસુરસાં મનોઽભિરામાં હરેઃ કથાં ત્યક્ત્વા ।
શ્રોતું શ્રવણદ્વન્દ્વં ગ્રામ્યં કથમાદરં ભવતિ ॥ ૧૯૨॥

દૌર્ભાગ્યમિન્દ્રિયાણાં કૃષ્ણે વિષયે હિ શાશ્વતિકે ।
ક્ષણિકેષુ પાપકરણેષ્વપિ સજ્જન્તે યદન્યવિષયેષુ ॥ ૧૯૩॥

---

॥ ૧૮॥ સગુણનિર્ગુણયોરૈક્યપ્રકરણમ્ ।

શ્રુતિભિર્મહાપુરાણૈઃ સગુણગુણાતીતયોરૈક્યમ્ ।
યત્પ્રોક્તં ગૂઢતયા તદહં વક્ષ્યેઽતિવિશદાર્થમ્ ॥ ૧૯૪॥

ભૂતેષ્વન્તર્યામી જ્ઞાનમયઃ સચ્ચિદાનન્દઃ ।
પ્રકૃતેઃ પરઃ પરાત્મા યદુકુલતિલકઃ સ એવાયમ્ ॥ ૧૯૫॥

નનુ સગુણો દૃશ્યતનુસ્તથૈકદેશાધિવાસશ્ચ ।
સ કથં ભવેત્પરાત્મા પ્રાકૃતવદ્રાગરોષયુતઃ ॥ ૧૯૬॥

ઇતરે દૃશ્યપદાર્થા લક્ષ્યન્તેઽનેન ચક્ષુષા સર્વે ।
ભગવાનનયા દૃષ્ટ્યા ન લક્ષ્યતે જ્ઞાનદૃગ્ગમ્યઃ ॥ ૧૯૭॥

યદ્વિશ્વરૂપદર્શનસમયે પાર્થાય દત્તવાન્ભગવાન્ ।
દિવ્યં ચક્ષુસ્તસ્માદદૃશ્યતા યુજ્યતે નૃહરૌ ॥ ૧૯૮॥

સાક્ષાદ્યથૈકદેશે વર્તુલમુપલભ્યતે રવેર્બિમ્બમ્ ।
વિશ્વં પ્રકાશયતિ તત્સર્વૈઃ સર્વત્ર દૃશ્યતે યુગપત્ ॥ ૧૯૯॥

યદ્યપિ સાકારોઽયં તથૈકદેશી વિભાતિ યદુનાથઃ ।
સર્વગતઃ સર્વાત્મા તથાપ્યયં સચ્ચિદાનન્દઃ ॥ ૨૦૦॥

એકો ભગવાન્નેમે યુગપદ્ગોપીષ્વનેકાસુ ।

અથવા વિદેહજનકશ્રુતદેવભૂદેવયોર્હરિર્યુગપત્ ॥ ૨૦૧॥

અથાવા કૃષ્ણાકારાં સ્વચમૂં દુર્યોધનોઽપશ્યત્ ।
તસ્માદ્વ્યાપક આત્મા ભગવાન્હરિરીશ્વરઃ કૃષ્ણઃ ॥ ૨૦૨॥

વક્ષસિ યદા જઘાન શ્રીવત્સઃ શ્રીપતેઃ સ કિં દ્વેષ્યઃ ।
ભક્તાનામસુરાણામન્યેષાં વા ફલં સદૃશમ્ ॥ ૨૦૩॥

તસ્માન્ન કોઽપિ શત્રુર્નો મિત્રં નાપ્યુદાસીનઃ ।
નૃહરિઃ સન્માર્ગસ્થઃ સફલઃ શાખીવ યદુનાથઃ ॥ ૨૦૪॥

લોહશલાકનિવહૈઃ સ્પર્શાશ્મનિ ભિદ્યમાનેઽપિ ।
સ્વર્ણત્વમેતિ લૌહં દ્વેષાદપિ વિદ્વિષાં તથા પ્રાપ્તિઃ ॥ ૨૦૫॥

નન્વાત્મનઃ સકાશાદુત્પન્ના જીવસંતતિશ્ચેયમ્ ।
જગતઃ પ્રિયતર આત્મા તત્પ્રકૃતે નૈવ સંભવતિ ॥ ૨૦૬॥

વત્સાહરણાવસરે પૃથગ્વયોરૂપવાસનાભૂષાન્ ।
હરિરજમોહં કર્તું સવત્સગોપાન્વિનિર્મમે સ્વસ્માત્ ॥ ૨૦૭॥

અગ્નેર્યથા સ્ફુલિઙ્ગાઃ ક્ષુદ્રાસ્તુ વ્યુચ્ચરન્તીતિ ।
શ્રુત્યર્થં દર્શયિતું સ્વતનોરતનોત્સ જીવસંદોહમ્ ॥ ૨૦૮॥

યમુનાતીરનિકુઞ્જે કદાચિદપિ વત્સકાંશ્ચ ચારયતિ ।
કૃષ્ણે તથાર્યગોપેષુ ચ વરગોષ્ઠેષુ ચારયત્સ્વારાત્ ॥ ૨૦૯॥

વત્સં નિરીક્ષ્ય દૂરાદ્ગાવઃ સ્નેહેન સંભ્રાન્તાઃ ।
તદભિમુખં ધાવન્ત્યઃ પ્રયયુર્ગોપૈશ્ચ દુર્વારાઃ ॥ ૨૧૦॥

પ્રસ્રવભરેણ ભૂયઃ સ્રુતસ્તનાઃ પ્રાપ્ય પૂર્વવદ્વત્સાન્ ।
પૃથુરસનયા લિહન્ત્યસ્તર્ણકવત્યઃ પ્રપાયયન્પ્રમુદા ॥ ૨૧૧॥

ગોપ અપિ નિજબાલાઞ્જગૃહુર્મૂર્ધાનમાઘ્રાય ।
ઇત્થમલૌકિકલાભસ્તેષાં તત્ર ક્ષણં વવૃધે ॥ ૨૧૨॥

ગોપા વત્સાશ્ચાન્યા પૂર્વં કૃષ્ણાત્મકા હ્યભવન્ ।
તેનાત્મનઃ પ્રિયત્વં દર્શિતમેતેષુ કૃષ્ણેન ॥ ૨૧૩॥

પ્રેયઃ પુત્રાદ્વિત્તાત્પ્રેયોઽન્યસ્માચ્ચ સર્વસ્માત્ ।
અન્તરતરં યદાત્મેત્યુપનિષદઃ સત્યતાભિહિતા ॥ ૨૧૪॥

નન્વુચ્ચાવચભૂતેષ્વાત્મા સમ એવ વર્તતેऽથ હરિઃ ।
દુર્યોધનેऽર્જુને વા તરતમભાવં કથં નુ ગતવાન્સઃ ॥ ૨૧૫॥

બધિરાન્ધપઙ્ગુમૂકા દીર્ઘાઃ ખર્વાઃ સરૂપાશ્ચ ।
સર્વે વિધિના દૃષ્ટાઃ સવત્સગોપાશ્ચતુર્ભુજાસ્તેન ॥ ૨૧૬॥

ભૂતસમત્વં નૃહરેઃ સમો હિ મશકેન નાગેન ।
લોકૈઃ સમસ્ત્રિભિર્વેત્યુપનિષદા ભાષિતઃ સાક્ષાત્ ॥ ૨૧૭॥

આત્મા તાવદભોક્તા તથૈવ નનુ વાસુદેવશ્ચેત્ ।
નાનાકૈતવયત્નૈઃ પરરમણીભિઃ કથં રમતે ॥ ૨૧૮॥

સુન્દરમભિનવરૂપં કૃષ્ણં દૃષ્ટ્વા વિમોહિતા ગોપ્યઃ ।
તમભિલષન્ત્યો મનસા કામાદ્વિરહવ્યથાં પ્રાપુઃ ॥ ૨૧૯॥

ગચ્છન્ત્યસ્તિષ્ઠન્ત્યો ગૃહકૃત્યપરાશ્ચ ભુઞ્જાનાઃ ।
કૃષ્ણં વિનાન્યવિષયં સમક્ષમપિ જાતુ નાવિન્દન્ ॥ ૨૨૦॥

દુઃસહવિરહભ્રાન્ત્યા સ્વપતીન્દદૃશુસ્તરૂન્નરાંશ્ચ
પશૂન્ ।
હરિરયમિતિ સુપ્રીતાઃ સરભસમાલિઙ્ગયાંચક્રુઃ ॥ ૨૨૧॥

કાऽપિ ચ કૃષ્ણાયન્તી કસ્યાશ્ચિત્પૂતનાયન્ત્યાઃ ।
અપિબત્સ્તનમિતિ સાક્ષાદ્વ્યાસો નારાયણઃ પ્રાહ ॥ ૨૨૨॥

તસ્માન્નિજનિજદયિતાન્કૃષ્ણાકારાન્વ્રજસ્ત્રિયો વીક્ષ્ય ।
સ્વપરનૃપતિપત્નીનામન્તર્યામી હરિઃ સાક્ષાત્ ॥ ૨૨૩॥

પરમાર્થતો વિચારે ગુડતન્મધુરત્વદૃષ્ટાન્તાત્ ।
નશ્વરમપિ નરદેહં પરમાત્માકારતાં યાતિ ॥ ૨૨૪॥

કિં પુનરનન્તશક્તેર્લીલાવપુરીશ્વરસ્યેહ ।
કર્માણ્યલૌકિકાનિ સ્વમાયયા વિદધતો નૃહરેઃ ॥ ૨૨૫॥

મૃદ્ભક્ષણેન કુપિઅતાં વિકસિતવદનાં સ્વમાતરં વક્ત્રે ।
વિશ્વમદર્શયદખિલં કિં પુનરથ વિશ્વરૂપોऽસૌ ॥ ૨૨૬॥

॥ ૧૯॥ આનુગ્રહિકપ્રકરણમ્ ।
વિષવિષમસ્તનયુગલં પાયયિતું પૂતના ગૃહં પ્રાપ્તા ।

તસ્યાઃ પૃથુભાગ્યાયા આસીત્કૃષ્ણાર્પણો દેહઃ ॥ ૨૨૭॥

અનયત્પૃથુતરશકટં નિજનિકટં વા કૃતાપરાધમપિ ।
કણ્ઠાશ્લેષવિશેષાદવધીદ્બાલ્યેઽસુરં કૃષ્ણઃ ॥ ૨૨૮॥

યમલાર્જુનૌ તરૂ ઉન્મૂલ્યોલૂખલગતશ્ચિરં ખિન્નૌ ।
રિઙ્ગન્નઙ્ગણભૂમૌ સ્વમાલયં પ્રાપયન્નૃહરિઃ ॥ ૨૨૯॥

નિત્યં ત્રિદશદ્વેષી યેન ચ મૃત્યોર્વશીકૃતઃ કેશી ।
કાકઃ કોઽપિ વરાકો બકોઽપ્યશોકં ગતો લોકમ્ ॥ ૨૩૦॥

ગોગોપીગોપાનાં નિકરમહિ પીડયન્તમતિવેગાત્ ।
અનઘમઘાસુરમકરોત્પૃથુતરમુરગેશ્વરં ભગવાન્ ॥ ૨૩૧॥

પીત્વારણ્યહુતાશનમસહ્યતત્તેજસો હેતોઃ ।
દગ્ધાન્મુગ્ધાનખિલાઞ્જુગોપ ગોપાન્કૃપાસિન્ધુઃ ॥ ૨૩૨॥

પાતુ ગોકુલમાકુલમશનિતટિદ્વર્ષણૈઃ કૃષ્ણઃ ।
અસહાયએકહસ્તે ગોવર્ધનમુદ્ધારોચ્ચૈઃ ॥ ૨૩૩॥

વાસોલોભાકલિતં ધાવદ્રજકં શિલાતલૈર્હત્વા ।
વિસ્મૃત્ય તદપરાધં વિકુણ્ઠવાસોઽર્પિતસ્તસ્મૈ ॥ ૨૩૪॥

ત્રેધા વક્રશરીરામતિલમ્બોષ્ઠીં સ્ખલદ્બપુર્વચનાત્ ।
સ્રક્ચન્દનપરિતોષાત્કુબ્જામૃજ્વાનનામકરોત્ ॥ ૨૩૫॥

નિહતઃ પપાત હરિણા હરિચરણાગ્રેણ કુવલયાપીડઃ ।
તુઙ્ગોન્મત્તમતઙ્ગઃ પતઙ્ગવદ્દીપકસ્યાગ્રે ॥ ૨૩૬॥

યુદ્ધમિષાત્સહ રઙ્ગે શ્રીરઙ્ગેનાઙ્ગસઙ્ગમં પ્રાપ્ય ।
મુસ્ષ્ટિકચાણૂરાખ્યૌ યયતુર્નિઃશ્રેયસં સપદિ ॥ ૨૩૭॥

દેહકૃતાદપરાધાદ્વૈકુણ્ઠોત્કણ્ઠિતાન્તરાત્માનમ્ ।
યદુવરકુલાવતંસઃ કંસં વિધ્વંસયામાસ ॥ ૨૩૮॥

હરિસંદર્શનયોગાત્પૃથુરણતીર્થે નિમજ્જતે તસ્મૈ ।
ભગવાન્નુ પ્રદદાદ્યઃ સદ્યશ્ચૈદ્યાય સાયુજ્યમ્ ॥ ૨૩૯॥

મીનાદિભિરવતારૈર્નિહતાઃ સુરવિદ્વિષો બહવઃ ।
નીતાસ્તે નિજરૂપં તત્ર ચ મોક્ષસ્ય કા વાર્તા ॥ ૨૪૦॥

યે યદુનન્દનનિહતાસ્તે તુ ન ભૂયઃ પુનર્ભવં પ્રાપુઃ ।
તસ્માદવતારાણામન્તર્યામી પ્રવર્તકઃ કૃષ્ણઃ ॥ ૨૪૧॥

બ્રહ્માણ્ડાનિ બહૂનિ પઙ્કજભવાન્પ્રત્યણ્ડમત્યદ્ભુતાન્
ગોપાન્વત્સયુતાનદર્શયદજં વિષ્ણૂનશેષાંશ્ચ યઃ ।
શમ્ભુર્યચ્ચરણોદકં સ્વશિરસા ધત્તે ચ મૂર્તિત્રયાત્
કૃષ્ણો વૈ પૃથગસ્તિ કોઽપ્યવિકૃતઃ સચ્ચિન્મયો નીલિમા ॥ ૨૪૨॥

કૃપાપાત્રં યસ્ય ત્રિપુરરિપુરમ્ભોજવસતિઃ
સુતા જહ્નોઃ પૂતા ચરણનખનિર્ણેજનજલમ્ ।
પ્રદાનં વા યસ્ય ત્રિભુવનપતિત્વં વિભુરપિ
નિદાનં સોઽસ્માકં જયતિ કુલદેવો યદુપતિઃ ॥ ૨૪૩॥

માયાહસ્તેઽર્પયિત્વા ભરણકૃતિકૃતે મોહમૂલોદ્ભવં માં
માતઃ કૃષ્ણાભિધાને ચિરસમયમુદાસીનભાવં ગતાસિ ।
કારુણ્યૈકાધિવાસે સકૃદપિ વદનં નેક્ષસે ત્વં મદીયં
તત્સર્વજ્ઞે ન કર્તું પ્રભવસિ ભવતી કિં નુ મૂલસ્ય શાન્તિમ્ ॥ ૨૪૪॥

ઉદાસીનઃ સ્તબ્ધઃ સતતમગુણઃ સઙ્ગરહિતો
ભવાંસ્તાતઃ કાતઃ પરમિહ ભવેજ્જીવનગતિઃ ।
અકસ્માદસ્માકં યદિ ન કુરુતે સ્નેહમથ તત્
વસસ્વ સ્વીયાન્તર્વિમલજઠરેઽસ્મિન્પુનરપિ ॥ ૨૪૫॥

લોકાધીશે ત્વયીશે કિમિતિ ભવભવા વેદના સ્વાશ્રિતાનાં
સંકોચઃ પઙ્કજાનાં કિમિહ સમુદિતે મણ્ડલે ચણ્ડરશ્મેઃ ।
ભોગઃ પૂર્વાર્જિતાનાં ભવતિ ભુવિ નૃણાં કર્મણાં ચેદવશ્યં
તન્મે દૃષ્ટૈર્નૃપુષ્ટૈર્નનુ દનુજનૃપૈરૂર્જિતં નિર્જિતં તે ॥ ૨૪૬॥

નિત્યાનન્દસુધાનિધેરધિગતઃ સન્નીલમેઘઃ સતા-
મૌત્કણ્ઠ્યપ્રબલપ્રભઞ્જનભરૈરાકર્ષિતો વર્ષતિ ।
વિજ્ઞાનામૃતમદ્ભુતં નિજવચો ધારાભિરારાદિદં
ચેતશ્ચાતક ચેન્ન વાઞ્છતિમૃષાક્રાન્તોઽસિ સુપ્તોઽસિ કિમ્ ॥ ૨૪૭॥

ચેતશ્ચઞ્ચલતાં વિહાય પુરતઃ સંધાય કોટિદ્વયં
તત્રૈકત્ર નિધેહિ સર્વવિષયાનન્યત્ર ચ શ્રીપતિમ્ ।
વિશ્રાન્તિર્હિતમપ્યહો ક્વ નુ ત્વયોર્મધ્યે તદાલોચ્યતાં
યુક્ત્યા વાનુભવેન યત્ર પરમાનન્દશ્ચ તત્સેવ્યતામ્ ॥ ૨૪૮॥

પુત્રાન્પૌત્રમથસ્ત્રિયોઽન્યયુવતીર્વિત્તન્યથોઽન્યદ્ધનં
ભોજ્યાદિષ્વપિ તારતમ્યવશતો નાલં સમુત્કણ્ઠયા ।
નૈતાદૃગ્યદુનાયકે સમુદિતે ચેતસ્યનન્તે વિભૌ
સાન્દ્રાનન્દસુધાર્ણવે વિહરતિ સ્વૈરં યતો નિર્ભયમ્ ॥ ૨૪૯॥

કામ્યોપાસનયાર્થયન્ત્યનુદિનં કિંચિત્ફલં સેપ્સિતં
કિંચિત્સ્વર્ગમથાપવર્ગમપરૈર્યોગાદિયજ્ઞાદિભિઃ ।
અસ્માકં યદુનન્દનાઙ્ઘ્રિયુગલધ્યાનાવધાનાર્થિનાં
કિં લોકેન દમેન કિં નૃપતિના સ્વર્ગાપવર્ગૈશ્ચ કિમ્ ॥ ૨૫૦॥

આશ્રિતમાત્રં પુરુષં
સ્વાભિમુખં કર્ષતિ શ્રીશઃ ।
લોહમપિ ચુમ્બકાશ્મા
સંમુખમાત્રં જડં યદ્વત્ ॥ ૨૫૧॥

અયમુત્તમોઽયમધમો
જાત્યા રૂપેણ સમ્પદા વયસા ।
શ્લાઘ્યોઽશ્લાઘ્યો વેત્થં
ન વેત્તિ ભગવાનનુગ્રહાવસરે ॥ ૨૫૨॥

અન્તઃસ્થભાવભોક્તા
તતોઽન્તરાત્મા મહામેઘઃ ।
ખદિરશ્ચમ્પક ઇવ વા
પ્રવર્ષણં કિં વિચારયતિ ॥ ૨૫૩॥

યદ્યપિ સર્વત્ર સમસ્તથાપિ નૃહરિસ્તથાપ્યેતે ।
ભક્તાઃ પરમાનન્દે રમન્તિ સદયાવલોકેન ॥ ૨૫૪॥

સુતરામનન્યશરણાઃ ક્ષીરાદ્યાહારમન્તરા યદ્વત્ ।
કેવલયા સ્નેહદૃશા કચ્છપતનયાઃ પ્રજીવન્તિ ॥ ૨૫૫॥

યદ્યપિ ગગનં શૂન્યં તથાપિ જલદામૃતાંશ્રૂપેણ ।
ચાતકચકોરનામ્નોર્દૃઢભાવાત્પૂરયત્યાશામ્ ॥ ૨૫૬॥

તદ્વદ્વ્રજતાં પુંસાં દૃગ્વાઙ્મનસામગોચરોઽપિ હરિઃ ।
કૃપયા ફલત્યકસ્માત્સત્યાનન્દામૃતેન વિપુલેન ॥ ૨૫૭॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ
પ્રબોધસુધાકરઃ સમાપ્તઃ ॥

Encoded by Sunder Hattangadi

*Prabodhasudhakara*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*